This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

76-77-78

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ७६ विषय अध्यात्म
नांव- अभ्यास चिंतन (पुस्तक २)
लेखक/लिपीकार नारायणस्वामी
पृष्ठ ७६
काळ ई.स. १९५९ पूर्ण/~~अपूर्ण~~

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ७७ विषय अध्यात्म
नांव- द.श.प्रजापतीनी स्मृती
लेखक/लिपीकार
पृष्ठ 33
काळ पूर्ण/~~अपूर्ण~~ गुजराती

कविकुलगुरु कालिदास संस्कृत
विश्वविद्यालय ग्रंथालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. ७८ विषय पूजाविधी
नांव- श्री प्रत्यंगिरा पूजाकल्प
लेखक/लिपीकार
पृष्ठ १८
काळ ~~पूर्ण~~/अपूर्ण संस्कृत

2

78

श्री

श्रीगुरुभ्यो नमः

॥ श्री परब्रह्मस्वरूपिन्यै नमः ॥

श्री प्रत्यंगिरा पूजा कल्पः

ह ॥
यो
ने
दक्षं
ऊर्ध्वे)

2



—: प्रत्यंगिरा यन्त्रं :—

ाम्यहं ॥

कर्तृश्यो

प्रेशानि

स्मि ,

(७दक्षं

ऊर्ध्वे)

(श्री महागणपतये नमः)

आब्रह्मलोकाद्दाशेषाद्दालोकालोकपर्वतात् ।
ये वसान्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहं ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः । सर्वोपप्लवप्रज्ञाने घनप्रत्यगर्थो ब्रह्माहमास्मि, सोऽहमास्मि, ब्रह्माहमास्मि ॥

– यागमान्दिरप्रवेशम् –

ॐ ऐं ह्रीं श्रीं भं भद्रकाल्ये नमः
(द्वारस्य दक्षशाखायां)



४ भं भैरवाय नमः
(द्वारस्य वामशाखायां)

४ लं लम्बोदराय नमः (द्वारस्य ऊर्ध्वे)

इति द्वारदेवतां संपूज्य

= गुरुपादुकामन्त्रः =

ओं ऐं ह्रीं श्रीं अमुकानन्दनाथभैरव श्री पादुकं पूज.नमः
४ अमुकानन्दनाथभैरव श्रीपरमगुरु "
४ अमुकानन्दनाथभैरव श्री परमेष्ठिगुरु "

इति मृगी मुद्रया गुरुपादुकामुच्चार्य सुमुख, सुवृत्त, चतुरश्र, मुद्गर, योन्याख्यादि पञ्चाभिर्मुद्राभिः श्री गुरुं वामभुजे प्रणम्य, गणपति मूलेन स्वदक्षभुजे यीनिमुद्रया महागणपतिं यजेत् ॥

घण्टपूजा

हे घण्टे सुस्वरे पीठे घण्टाध्वनिविभूषिते
वादयान्ति परानन्दे घण्टादेवं प्रपूजयेत् ।
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्
कुर्यात् घण्टारवं तत्र देवता ह्वानं लाञ्छनम्

(इति घण्टानादं कृत्वा)

सङ्कल्पः

शुक्लाम्बरधरं विष्णुं शशीवर्णं चतुर्भुजं
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

मूलेन प्राणानायम्य, देशकालौ संकीर्त्य

मम श्री प्रत्यङ्गिरा प्रीत्यर्थं यथासंभवद्रव्यैः
यथा शक्ति सपर्याक्रमं निर्वर्तायिष्ये -
तेन परमेश्वरं प्रीणयामि ॥

आत्मानं अलंकृत्य सुरभिल्लवदनः सन्
प्रमुदितचित्तेन आसनमास्तीर्य दाक्षिणहस्ते
जलमादाय (मूलमन्त्रेण) आसनं प्रोक्षयेत्
अस्य श्री आसनमहामन्त्रस्य -
पृथिव्या मेरुपृष्ठ ऋषिः - सुतलं छन्दः
कूर्मो देवता - आसने विनियोगः
पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता
त्वं च धारय मां देहि पवित्रं कुरु चासनम्

योगासनाय नमः; वीरासनाय नमः ;
शरासनाय नमः ;
ॐ ऐं ह्रीं श्रीं ॐ ह्रीं आधारशक्तिकमलासनाय
नमः ॥
इति पुष्पाक्षतैः आसनमभ्यर्च्य आसने उपविशेत्

४ रत्नद्वादश शक्तियुताय द्वीपनाथाय नमः
। इति भूमौ पुष्पाञ्जलिं विकिरेत् ॥

- देह रक्षा -

४ ऐं ह्रीं श्री प्रत्यङ्गिरे आत्मानं रक्ष रक्ष -
इति देहे त्रिः व्यापकं कृत्वा
गुं गुरुभ्यो नमः (दक्षबाहौ)

गं गणपतये नमः (वामबाहौ)

दुं दुर्गायै नमः (दक्षोरौ)

वं वटुकाय नमः (वामोरौ)

यां योगिनीभ्यो नमः (पादयोः)

क्षं क्षेत्रपालाय नमः (नाभौ)

पं परमात्मने नमः (हृदये)

(अथ शिखा बन्धनं)

तीक्ष्ण दंष्ट्र महाकाय कल्पान्तदहनोपम
भैरवाय नमस्तुभ्यं अनुज्ञां धातुमर्हसि
(इति शिखा बन्धनेन भैरवाज्ञां गृहीत्वा)

॥ प्राणायामं कुर्यात् ॥

त्रिराचम्य - प्राणायामं कृत्वा

दश ओंकारं उच्चरन् वायुं पूरयेत्

दश ओंकारं उच्चरन् वायुं कुम्भयेत् -

दश ओंकारं उच्चरन् वायुं रेचयेत् -

- आत्मप्राणप्रतिष्ठा -

हृदि दक्षकरतलं निधायं - ओं सोऽहं इति त्रिं पठेत् ॥

अथ मूलेन त्रिधा प्राणानायम्य -

- विघ्नोत्सारणम् -

अपसर्पन्तु ~~से~~ ते भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया

इती मन्त्रमुच्चार्य- युगपद्वामपार्ष्णिभूतला-
घातत्रय करास्फोटनत्रय पूर्वक तालत्रयेण
विघ्नानुत्सारयेत् ॥
तदनन्तरं अन्तर्मातृका, बहिर्मातृका न्यासं
कृत्वा - पात्रासादनं कुर्यात् ॥

- अथ कलशपूजा -

वामबाहे
स्व(दक्षिणतः) कलशोदकं संस्थाप्य -
कुङ्कुमाक्षतान् गृहीत्वा -
ॐ ऐं ह्रीं श्रीं अं अग्निमण्डलाय धर्मप्रददश-
कलात्मने कलशाधाराय नमः
ओं ऐं ह्रीं श्रीं उं सूर्यमण्डल अर्थप्रद-
द्वादशकलात्मने वर्धनीकलशामृताय नमः
ओं ऐं ह्रीं श्रीं मं सोममण्डलाय कामप्रद-
षोडशकलात्मने वर्धनीकलशामृताय नमः
(इति संपूज्य)
गंध पुष्पाक्षतैरलंकृत्वा -

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रित
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृता
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा
ऋग्वेदोऽथ युजुर्वेदो सामवेदोऽप्यथर्वणः
अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः
आयान्तु देवी पूजार्थं दुरितक्षयकारकाः

गङ्गे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु
आपो वा इदँ सर्वं -------

मूलेन अष्टवारं अभिमन्त्र्य, धेनुमुद्रां प्रदर्श्य तज्जलेन पूजोपकरणानि आत्मानं च प्रोक्षयेत्

(मूलेन) ऋष्यादि षडङ्गन्यासं कृत्वां

ऋषये नमः – शिरसि
छन्दसे नमः - मुखे
श्री प्रत्यङ्गिरा देवता- हृदये

(प्रत्यंगिरा मन्त्रेण षडङ्गन्यासं कृत्वा)

सामान्यार्घ्यविधिः

वर्धनीपात्रस्य दक्षिणतः वर्धनीपात्रगतेन जलेन त्रिकोण-षटकोण-वृत्त-चतुरस्रात्मकं मण्डलं मत्स्य मुद्रया निर्माय अर्घ्यपात्र शंखं संस्थापयेत् ---



ततः ऐं ह्रीं श्रीं अस्त्राय फट्-
इति सामान्यार्घ्यपात्रस्य आधारं
प्रक्षाल्य

४ अं अग्निमण्डलाय ~~नम~~ धर्मप्रद दशकलात्मने
श्री महात्रिपुरभैरवसहित प्रत्यङ्गिरायाः
सामान्यार्घ्यपात्राधाराय नमः
इति मण्डलस्योपरि संस्थाप्य

दश वह्निकलाः संपूजयेत्

४ धूम्रार्चि आदि कव्यवाहिनी कलान्तं पूजयामि

४ ॐ सूर्यमण्डलायार्थप्रद द्वादशकलात्मने
श्रीभैरव सहित ~~[illegible]~~ प्रत्यङ्गिरायाः
सामान्यार्घ्यपात्राय नमः इति संस्थाप्य
सूर्यमण्डलं विभाव्य द्वादश सूर्यकलाः पूजयेत्

४ तपिन्यादि क्षमा कलान्तं पूजयामि

४ मं सोममण्डलाय कामप्रद षोडशकलात्मने
त्रिपुरभैरव सहित त्रिपुरभैरवी श्री प्रत्याङ्गिरायाः
सामान्यार्घ्योदकाय नमः इति वर्धनी
पात्रं सलिलात् शंखं आपूर्य.....

४ अमृतादि पूर्णामृतकलान्तं पूजयामि

इति पूजयित्वा

मत्स्य-योनिमुद्रां प्रदर्श्य अंकुशमुद्रया
सूर्यमण्डलान्तर्गत तीर्थमावाह्य - कुंभे पुष्पं
दत्वा -

शापमोचनं

एवमेव परं ब्रह्म स्थूल सूक्ष्ममयं ध्रुवम्
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं
सूर्यमण्डलसम्भूते वरुणालय संभवे ॥ अमा
बीजमये देवि शुक्रशापाद्विमुच्यतां ॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि

तेन सत्येन हे देवि ब्रह्महत्यां व्यपोहतु
(इति त्रिः पठेत्)

ततः ओं वां वीं वूं वैं वौं वः ब्रह्म-
शापमोचिता सुरादेव्यै नमः (इति त्रिः)

ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्ण
शापं मोचय मोचय अमृतं स्रावय
स्रावय स्वाहा (इति त्रिः)

हंसः शुचिषाद्वसुरन्तरिक्षस -न्टष-...
अद्रिजा ऋतम् इत्यपि त्रिः पठित्वा
आनन्द भैरव्य सुधाभैरवीं च ध्यात्वा
हसक्षमलवरयूं - ओं आनन्दभैरवाय वौषट्
सहक्षमलवरयहुं - सुरादेव्यै वौषट्

इति देव देव्यौ त्रिः संपूज्य ~~क्र~~

-अर्घ्यपात्रं संस्थापयेत्-

श्री पात्रात्किञ्चिज्जलमुद्धृत्य

ॐ आनन्दभैरवं तर्पयामि नमः (इति त्रिः)
ततः स्वगुरुं तर्पयामि श्री अमुकानन्दनाथेति
परमगुरुं तर्पयामि (तत्तन्मन्त्रेण)
परमेष्ठिगुरुं तर्पयामि इति त्रिः तर्पयेत्
श्री पात्रामृतेन किंचिज्जलं उद्धृत्य
(मूलदेवीं) श्री प्रत्यङ्गिरां सायुधां
सवाहनां सपरिवारां तर्पयामि नमः

-कलशपूजा समाप्ता-

यन्त्र उद्धारः

॥ बिन्दु त्रिकोण वसुकोणयुक्तां वृत्ताष्टपत्रं च
त्रिवृत्तयुक्तां भूगेह लक्ष्मी खचितं च सिद्धिदं
प्रात्यङ्गिरं चक्रमेतन्नमामि ॥

ततः पीठपूजां विधाय -
चक्रोपरि श्री प्रत्यङ्गिरां ध्यात्वा -
यं इति वायबीजेन वामनासापुटेन
देवीं स्वहृदयात् कुसुमाञ्जलिमानीयावाह्य

आवाहनं =

ओं देवेशि भक्तिसुलभे परिवारसमान्विते
यावत्त्वां पूजायिष्यामि तावद्देवि इहावह
इति पठेत्

(मूलं) श्री भैरव सहिते श्री प्रत्यङ्गिरे
इह आगच्छ सान्निध्यं कुरु कुरु
मम सर्वोपचारपूजां गृह्ण गृह्ण इत्यावाहनादि
मुद्राः प्राणप्रतिष्ठापूर्वकं कुर्यात्

प्राणप्रतिष्ठां श्री यन्त्रे वैदिकमन्त्रैरेव
कुर्यात् ॥

श्री पात्रामृतेन सायुधां सवाहनां सपरिवारां सावरणां श्री भैरव सहितां
श्री प्रत्यगिरां तर्पयामि (इति त्रिः)

(मूलेन) प्रत्यंगीरा श्री पादुकां पू-त नमः
(त्रिः)

(मूलं) उच्चार्य

एतत्पाद्यं श्री भैरव सहित प्रत्यङ्गिरायै
नमः,

पाद्यं समर्पयामि;

अर्घ्यं Do.

आचमनीयं समर्पयामि

मधुपर्कं "

स्नानं "

दुकूलं "

कुङ्कुम कस्तूरी चन्दन सिन्दूर मुकुट कुण्डल
हार नूपुरादि नानालंकारान् दत्वा
(पुनराचमनीयं दत्वा)

४ गन्धं समर्पयामि ---

४ पुष्पैः पुजायि .....

~~४ धूपं दर्शयामि~~ ....

ओं जगद्ध्वनिमन्त्रमातः स्वाहा इति (घटापूजां)
कृत्वा वामपाणिना घण्टां वादयेत् ...

ओ भूर्भुवःस्वः (गायत्रीमूलं) धूपं दर्शयामि

ओं भूर्भुवःस्वः (,,)

सुप्रकाशो महादीपः सर्वत्रातिमिरापहः

सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यतां

दीपं दर्शयामि

आरार्तिकं

श्रीं सौं ग्लूं म्लूं स्लूं, प्लूं, ब्लूं सौं ...

श्री रत्नेश्वर्यै नमः (पुष्पं दत्वा)

(हस्तौ आरार्तिकपात्रं गृहीत्वा) दर्शयेत्

(मूलं) समस्तचक्रचक्रेशीयुते देवि नवात्मिके

आरार्तिकमिदं देवि गृहाण मम सिद्धये॥

नीराजनं समर्पयामि

ततः नैवेद्यं पात्रे निक्षिप्य -

हुं इत्यवकुण्ठ्य

धेनुमुद्रयाऽमृतीकृत्य

(मूलं) हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतं

पंचधा षड्रसोपेतं गृहाण परमेश्वरि ...

नैवेद्यं (श्री प्रत्यागिरा प्रीत्यर्थं) निवेदयामि

(ततः पुनराचमनीयं दत्वा)

(मूलं) कर्पूरादियुक्तं ताम्बूलं निवेदयामि

मूलेन देवीं त्रिः तर्पयेत् तत्वमुद्रया

- आवरणपूजा -

४ संविन्मये परे देवि परामृतरुचिप्रिये ।
अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे ॥

४ पूर्वावित:

४ इन्द्राय नमः इन्द्रश्री पादुकां पूजयामि त-नमः

४ अग्नये नमः अग्निश्री "

४ यमाय नमः यम श्री "

४ निऋतये नमः निऋति श्री "

४ वरुणाय नमः वरुणश्री "

४ वायवे नमः वायु श्री "

४ कुबेराय नमः कुबेर श्री "

४ ईशानाय नमः ईशानश्री "

(इन्द्र ईशानयोर्मध्ये)

४ ब्रह्म श्री पादुकां पूजयामि तर्पयामि नमः

(वरुण राक्षसयोर्मध्ये)

४ विष्णु श्री पा - पू - त - नमः

आयुधानि

४ वज्राय नमः वज्र श्री पा-पू-त-नमः

४ शक्त्ये नमः शक्ति श्री "

४ दंडाय नमः दंड श्री "

४ खड्गाय नमः खड्ग श्री "

४ पाशाय नमः पाश श्री "

४ ध्वजाय नमः ध्वज श्री पा-पू-त-नमः

४ गदायै नमः गदा श्री "

४ त्रिशूलाय नमः त्रिशूल श्री "

४ पद्माय नमः पद्म श्री "

४ चक्राय नमः चक्र श्री "

४ एता: इन्द्राद्या देवता: समुद्रा: सासिद्ध्य:
सायुधा: सशक्तय: सवाहना: सपरिवारा:
सर्वोपचारै: संपूजिता: संतर्पिता: संतुष्टा:
सन्तु नमः (पुष्पाञ्जलि:)

४ अभीष्टसिद्धिं मे देहि शरणागतवत्सले
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं
(सामान्य अर्घ्य उदकेन देया वामहस्ते पुजां समर्प्ये

-(द्वितीयावरणं)-

त्रिवृत्ते -

प्रथमरेखायां

४ कैलानन्दनाथ परमगुरुश्री पा-पू-त-नम:

४ " परमाचार्यगुरुश्री "

४ " परमेष्ठिगुरुश्री "

द्वितीयरेखायां

४ दि०यौघ श्री पा-पू-त-नम:

४ सिद्धौघ श्री "

४ मानवौघ श्री "

तृतीय रेखायां

४ स्वगुरु श्री पा-पू-त-नम:

एता: ओघत्रय गुरव: सासिद्धय: समुद्रा:

सायुधा: सशक्तय: सवाहना: सपरिवारा:

संपूजिता: सतर्पिता: सन्तु नम: (पुष्पाञ्जलि)

(अभीष्टसिद्धिं मे देहि इति द्वितीयावरणं देव्या हस्ते समर्पयेत)

अष्टदले (पूर्वादित:)-तृतीयावरणम् -

पूर्वे

४ अं असिताङ्ग भैरव श्री पा-पू-त-नम:

४ आं ब्राह्मी श्री "

दक्षिणे

४ इं रुरुभैरव श्री "

ईं माहेश्वरी भैरव श्री "

४ उं चण्ड भैरव श्री पा-पू-त-नमः

४ ऊं कौमारी भैरव श्री

पाश्चिमे

४ ऋं क्रोध भैरव श्री "

४ ॠं वैष्णव भैरव श्री "

४ ऌं उन्मत्त भैरव श्री "

४ ॡं वाराही भैरव श्री —

वायव्ये

४ एं कपालि भैरव श्री "

४ ऐं माहेन्द्री भैरव श्री "

ईशान्ये

४ ओं भीषण भैरव श्री "

४ औं चामुण्डा भैरव श्री पा-पू-त-नमः

४ अं संहार भैरव श्री "

४ अः नारासिंही भैरव श्री "

ग्रंथि स्थानेषु (पाश्चिमादितः)

४ कामरूप पीठ श्री पा-पू-त-नमः

वायव्ये ४ मलयगिरि पीठ श्री "

उत्तरे ४ कोलागिरि पीठ श्री "

ईशान्ये ४ कालान्तक पीठ श्री "

पूर्वे ४ चौहार पीठ श्री "

आग्नेये ४ जालंधर पीठ श्री "

दक्षिणे ४ उड्डियाण पीठ श्री "

नैरृते : ४ देवकूट पीठ श्री पा-पू-त-नमः

एता: आसीताङ्ग भैरवाद्या: सायुधा: स[illegible] ----

सन्तुष्टा: सन्तु नमः (पुष्पाञ्जलिः)

अभीष्टसिद्धिं मे देहि - तृतीयावरणार्चनं [illegible]ति

वृत्ते (पाश्चिमादितः) - चतुर्थावरणं -

ऊर्ध्वमध्यश्च ४ हेरुक भैरव श्री पा-पू-त-नमः

वायव्ये ४ वेताल भैरव श्री "

उत्तरे ४ त्रिपुरान्तकभैरवश्री "

ईशान्ये ४ अग्निजिह्वभैरवश्री "

पूर्वे ४ कालान्तक भैरव श्री ,,

आग्नेये ४ कापालि भैरव श्री ,,

दक्षिणे ४ एकपाद भैरव श्री ,,

नैरृते २ भीमरूप भैरव श्री पा-पू-त-न

ऊर्ध्वे ४ [illegible] भैरव श्री "

अधः ४ हाटकभैरव श्री "

(एता: ~~[illegible]~~ तुरीयावरणदेवता : सन्तुष्टा: सन्तु (पुष्पं:)

अष्टयोनिषु (पूर्वादितः) — पञ्चमावरणं —

४ ऐं ह्रीं श्रीं स्तंभिनी श्री पा-पू-त-नम

" क्षोभिनी श्री --

" द्राविणी श्री "

" भ्रामणी श्री "

" रौद्री श्री "

" संहारिणी श्री "

१) आग्नेये " हृदय श्री "

२) ईशाने " शिर: श्री "

३) नैरृते ४ → शिखा श्री

४) मध्ये वायव्ये (४) → नेत्र श्री → कवच श्री ,,

दिक्षु " अस्त्र श्री "

ईशान्ये " द्वादशादित्येभ्यो नमः - - -

आग्नेये " एकादशरुद्रेभ्यो नमः "

१) नैऋते सर्वेभ्यो भूतेभ्यः श्री पा-पू-त-नमः
(एताः षष्ठावरणदेवताः सुप्रीताः सन्तुष्टाः सन्तु नमः
देव्या समीपे ह [illegible] (त्रिकोणे)

(सप्तमावरण) :

४ आसे श्री पा-पू-त-नमः

१ धर्मे श्री पा-पू-त-नमः

~~[illegible]~~ त्रिकोण बाह्ये

४ ~~ईशाने~~ (आग्नेये) — काली श्री पा-पू-त-नमः
३ (ईशाने) ——— भद्रकाली "
१ ~~आग्नेये~~ (वरुणायां) नित्यकाली श्री ,,

एताः सप्तमावरणदेवताः सन्तुष्टाः सन्तु नमः
बिन्दौ मूलं उच्चार्य

४ श्री भैरव सहितां श्री प्रत्यंगिरा परवाम पा-पू-तर्पयामि नमः

(अर्चना)

— पुनः धूप-दीप-नैवेद्यं कार्यं —

```
[OrderDescription]
,CREATED=05.08.19 12:20
,TRANSFERRED=2019/08/05 at 12:25:58
,PAGES=20
,TYPE=STD
,NAME=S0001298
,Book Name=M-78-SHRI PRATYANGIRI PUJAKALSAP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,
```